# yamaka kAvyaM (ghaTakarpara)

# યમક કાવ્યં (ઘટકર્પર)

## Document Information

Text title : yamaka kAvyaM (ghaTakarpara)

File name : yamaka.itx

Category : kAvya, misc, sahitya

Location : doc_z_misc_general

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami swami at math.mun.ca

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

yamaka kAvyaM (ghaTakarpara)

# યમક કાવ્યં (ઘટકર્પર)

ઘટકર્પર યમક  કાવ્યમ્

નિચિતં ખમુપેત્ય નીરદાઇઃ
પ્રિયહીનાહૃદયાવનીરદૈઃ ।
સલિલૈર્વિહતં રજઃ ક્ષિતૌ
રવિચન્દ્રાવપિ નોપલક્ષિતૌ ॥ ૧॥

હંસા નદન્મેઘભયાદ્ દ્રવન્તિ
નિશામુખાન્યદ્ય ન ચન્દ્રવન્તિ ।
નવામ્બુમત્તાઃ શિખિનો નદન્તિ
મેઘાગમે કુન્દસમાનદન્તિ ॥ ૨॥

મેઘાવૃતં નિશિ ન ભાતિ નભો વિતારં
નિદ્રાઽભ્યુપૈતિ ચ હરિં સુખસેવિતારમ્ ।
સેન્દ્રાયુધશ્ચ જલદોઽદ્ય રસન્નિભાનાં
સંરમ્ભમાવહતિ ભૂધરસન્નિભાનામ્ ॥ ૩॥

સતડિજ્જલદાર્પિતં નગેષુ
સ્વનદમ્ભોધરભીતપન્નગેષુ ।
પરિધીરરવં જલં દરીષુ
પ્રપતત્યદ્ભુતરૂપસુન્દરીષુ ॥ ૪॥

ક્ષિપ્રં પ્રસાદયતિ સમ્પ્રતિ કોઽપિ તાનિ
કાન્તામુખાનિ રતિવિગ્રહકોપિતાનિ ।
ઉત્કણ્ઠયન્તિ પથિકાઞ્જલદાઃ સ્વનન્તઃ
શોકઃ સમુદ્ભવતિ તદ્વનિતાસ્વનન્તઃ ॥ ૫॥

છાદિતે દિનકરસ્ય ભાવને
ખાજ્જલે પતતિ શોકભાવને ।
મન્મથે ચ હૃદિ હન્તુમુદ્યતે

પ્રોષિતપ્રમદયેદમુદ્યતે ॥ ૬॥

સર્વકાલમતિલઙ્ઘ્ય તોયદા
આગતાઃ સ્થ દયિતો ગતો યદા ।
નિર્ઘૃણેન પરદેશસેવના
મારયિષ્યથ ન તેન મા વિના ॥ ૭॥

બ્રૂત તં પથિકપાંશુલં ઘના
યૂયમેવ પથિશીઘ્રલઙ્ઘનાઃ ।
અન્યદેશરતિરદ્ય મુચ્યતાં
સાઽથવા તવ વધૂ કિમુચ્યતમ્ ॥ ૮॥

હંસઃ પઙ્ક્તિરપિ નાથ સમ્પ્રતિ
પ્રસ્થિતા વિયતિ માનસમ્પ્રતિ ।
ચાતકોઽપિ તૃષિતોમ્બુ યાચતે
દુઃખિતા પથિક સા પ્રિયા ચ તે ॥ ૯॥

નીલશષ્પમતિભાતિ કોમલં
વારિ વિન્દતિ ચ ચાતકોઽમલમ્ ।
અમ્બુદૈઃ શિખિગણો વિનાદ્યતે
કા રતિઃ પ્રિય મયા વિનાઽદ્યતે ॥ ૧૦॥

મેઘશબ્દમુદિતાઃ કલાપિનઃ
પ્રોષિતાહૃદયશોકલાપિનઃ ।
તોયદાગમકૃશા ચ સાઽદ્યતે
દુર્ધરેણ મદનેન સાદ્યતે ॥ ૧૧॥

કિં કૃપાપિ તવ નાસ્તિ કાન્તયા
પાણ્ડુગણ્ડપતિતાલકાન્તયા ।
શોકસાગરજલેઽદ્ય પાતિતાં
ત્વદ્ગુણસ્મરણમેવ પાતિ તામ્ ॥ ૧૨॥

કુસુમિતકુટજેષુ કાનનેષુ
પ્રિયરહિતેષુ સમુત્સુકાનનેષુ ।
દ્રવતિ ચ કલુષે જલે નદીનાં
કિમિતિ ચ માં સમવેક્ષસે ન દીનામ્ ॥ ૧૩॥

માર્ગેષુ મેઘસલિલેન વિનાશિતેષુ
કામો ધનુઃ સ્પૃશતિ તેન વિના શિતેષુ ।
ગમ્ભીરમેઘરસિતવ્યથિતા કદાહં
જહ્યાં સખિપ્રિયવિયોગજશોકદાહમ્ ॥ ૧૪॥

સુસુગન્ધિતયા વનેઽજિતાનાં
સ્વનદમ્ભોધરવાતવીજિતાનામ્ ।
મદનસ્ય કૃતે નિકેતકાનાં
પ્રતિભાન્તીહ વનાનિ કેતકાનામ્ ॥ ૧૫॥

તત્સાધુ યત્ત્વાં સુતરાં સસર્જ
પ્રજાપતિઃ કામનિવાસ સર્જ ।
ત્વં મઞ્જરીભિઃ પ્રવરો વનાનાં
નેત્રાત્સવશ્ચાસિ સયૌવનાનામ્ ॥ ૧૬॥

નવકદમ્બ શિરોઽવનતાસ્મિ તે
વસતિ તે મદનઃ કુસુમસ્મિતે ।
કુટજ કિં કુસુમૈરુપહસ્યતે
પ્રણિપતામિ ચ દુષ્પ્રસહસ્યતે ॥ ૧૭॥

તરુવર વિનતાસ્મિ તે સદાઽહં
હૃદયં મે પ્રકરોષિ કિં સદાહમ્ ।
તવ કુસુમ નિરીક્સણેઽપ્દેઽહં
વિસૃજેયં સહસૈવ નીપ દેહમ્ ॥ ૧૮॥

કુસુમૈરુપશોભિતાં સિતૈ-
ર્ઘનમુક્તામ્બુલવપ્રહાસિતૈઃ ।
મધુનઃ સમવેક્ષ્ય કાલતાં
ભ્રમરશ્ચુમ્બતિ યૂથિકાલતામ્ ॥ ૧૯॥

તાસામૃતુઃ સફલ એવ હિ યા દિનેષુ
સેન્દ્રાયુધામ્બુધરગર્જિતદુર્દિનેષુ ।
રત્યુત્સવં પ્રિયતમૈઃ સહ માનયન્તિ
મેઘાગમે પ્રિયસખીશ્ચ સમાનયન્તિ ॥ ૨૦॥

કોકિલભ્રમરકોકકૂજિતે
મન્મથેન સકલે જને જિતે ।

નિર્ગતોઽસિ શઠ માસિ માધવે
નોપયાસિ શયિઓઽપિ માધવે ॥ ૨૧॥

એતન્નિશમ્યવિરહાનલપીડિતાયા-
સ્તસ્યા વચઃ ખલુ દયાલુરપીડિતાયા ।
સ સ્વારવેણ કથિતં જલધૈરમોઘૈઃ
પ્રત્યાયયૌ સદનમૂનદિનૈરમોઘૈઃ ॥ ૨૨॥

ભાવાનુરક્તવનિતાસુરતૈઃ શપેય-
માલમ્બ્ય ચામ્બુ તૃશિતઃ કરકોશપેયમ્ ।
જોયેય યેન કવિના યમકૈઃ પરેણ
તસ્મૈ વહેયમુદકં ઘટકર્પરેણ ॥ ૨૩॥

॥ સમાપ્તમિદં ઘટકર્પર યમક કાવ્યમ્ ॥

Encoded and proofread by to P . P . Narayanaswami at swami at math.mun.ca

*yamaka kAvyaM (ghaTakarpara)*
pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*